## तृतीयोऽध्यायः

# कर्म विषयक - विवेचनम्

# तृतीयोऽध्यायः

# कर्म - विषयक - विवेचनम्

प्रथमो विरामः	वेदेषु कर्मसिध्दान्ताः।

द्वितीयो विरामः	ब्राह्मणग्रंथेषु कर्मनिरूपणम्।

तृतीयो विरामः	वेदोत्तरसाहित्ये कर्मनिरूपणम्।

चतुर्थो विरामः	महाकाव्येषु कर्मसिध्दान्तविचारः।

## प्रथमोविरामः

# वेदेषुकर्मसिध्दान्ताः

उपनिषत्सु साहित्यं वैदिकसाहित्ये श्रेष्ठतरं गण्यते।उपनिषसदां ये ये विषयाः वर्णनिताः सन्ति। ते सर्वे विषयाः वेदानामेव सन्ति। उपनिषत्शब्दस्य अर्थ एवं भवति - यत् वेदानां रहस्य एव उपनिषदः। उपनिषद् शब्दःत्रिधातुभ्यः निष्पन्नं भवति। यथा विशरणं गति अवसादनं च।यस्याध्ययनं अनर्थानां नाशः साम्यगर्थानां प्राप्तिः तदवदेव वेदस्य सिध्दान्तः उपनिषत्सु निहितः वर्तते।

उपनिषादयति सर्वानर्थकरसंसारं विनाशयति ।

संसारकारणभूतामविद्यामविद्यां च शिथिलयति ब्रह्म च गमयति॥[1]

चर्तुणां वेदानां स्वातन्त्रेन एकैका उपनिषद अस्त्येव।

वेदानां यो सिध्दान्तः सैव उपनिषदां सिध्दान्तः यतोहि :- वेदेषु ईष्ट प्राप्ति अनिष्ट परिहारार्ह । वेदानां सिध्दान्त विषये उपनिषदां अध्ययनमाश्वयकमिति। एतत् पूर्व वेदानां के सिध्दान्ताः येषां वर्णनम्

---

१ तै. ती. उपनिषत्।

उपनिषत्सु प्राप्यते - वेदाः चतुर्वर्गस्य साधकाःवेदाः धर्ममार्थकाममोक्षानां प्राप्त्युपायः सन्ति। यथा-

वेदाः खलु विश्वस्यैव प्राचिनतमं साहित्यम्। वेदाः खलु तस्य महाभूतस्य निःश्वसितमेतदिति।

यस्य निः श्वसितं वेदाः। वेद ज्ञान स्वरूपमस्ति।[1]

धर्म जिज्ञासमानानां प्रमाणं परमं श्रुतिः।[2]

येनकर्म्माण्यपसोमनीषिणोयज्ञे कृण्वन्ति विदथेषु धीराः।[3]

यदपूर्व्वंय्यक्षमन्तः प्रजानान्तन्न्मे मनः शिवसङ्कल्पमस्तु॥

**मंत्रार्थ :-** अपसः अर्थात् कर्मानुष्ठाने तत्परः अप इति कर्म नाम वाचकः शब्दः। धीराः बुध्दिसम्पन्नः। मनीषिणः मेधावी। यज्ञे येन कर्माणि कृण्वन्ति। प्रजानामन्तःकरणे विदथेषु हव्यादि पदार्थज्ञाने यत् अपूर्वम् आत्मरूप पक्षम् तन्मे मनः शिवसङ्कल्पमस्तु तत् मे मनः कल्याणकारी धर्मविषयक संकल्पितवान भवतु॥

---

**१**–सायणीयभाष्यमङ्गलाचरण।

**२**–मनु स्मृति १।१३ ॥

**३**– यजु व्रा.सं ३४।२।१॥

यत्प्रज्ञाननमुतचेतो धृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ।

यस्म्मान्नऽऋते किञ्चन कर्म्म क्रियते तन्न्मे मनः शिवसंङ्कल्पमस्तु ॥[1]

**मंत्रार्थ** :- यत् मनः प्रज्ञनाम्। प्रकृष्टं ज्ञानोतपन्न कृतवान् उत चेतः । सम्यक् प्रकारेण च धृतिः धैर्यस्वरूप यत् । अमृतम् आत्मस्वरूपत्वात् अविनाशि यः प्रजासु प्राणिनां मध्ये न्तः अन्तर वर्तमान ज्योतिः प्रकाशकः यस्मात् ऋते किञ्चन कर्म -कार्य न क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥

सोमोधेनु गुँ सोमोऽअव्वन्तमाशु गुँ सोमे व्वीरङ्कर्म्मण्ण्यन्ददाति ।

सादन्यं व्वित्त्थ्य गुँ सभेयम्पितृश्रवणं य्योददाशदस्म्मै ॥[2]

**मंत्रार्थ** :- यः अस्मै ददाशत् सोमः धेनुम् सोमः आशुम् अर्वन्तम् सोमः कर्मण्यम् कुशलम्। सादन्यम् -गृहकार्ये कुशलम् । विदथ्यम् - यज्ञकार्ये कुशलम्। सभेयम् -सभ योग्यं पितृश्रवणम् । वीरम्- वीरपुत्रे ददाति ।

अप्न्पस्वतीमश्विना व्वाचमस्म्मेकृतन्नोदस्रा व्वृषणामनीषाम् ।

अद्युत्ये वसेनिह्वयेवां व्वृधेचनो भवतं व्वाजसातौ ॥[3]

---

**१** -- यजु व्रा.सं ३४ ।३ ।१ ॥

**२** - यजु व्रा.सं ३४ ।२१ ।१

**३**-- यजु व्रा.सं ३४ ।२९ ।१

**मंत्रार्थ :-** दस्त्रा - हे दर्शनीय । वृषणा -अश्विना ।अस्मे -वाचम्। नः मनीषाम्-बुध्दिनाम्। अप्नस्वतीम् -कर्मवाचकः शब्दः कृतम् च अद्युत्ये-सन्मार्गे। अवसे -अनने वाम् निह्वये वाजसातौ अन्नविभाग यज्ञे नः वृधेभवतम्॥

# द्वितीयोविरामः

## ब्राह्मणग्रन्थेषु कर्मनिरूपणम्।

**ब्राह्मणग्रन्थस्य परिचयः**

मन्त्रातिरिक्त वेद भागः 'ब्राह्मण' पदेन अभिधियते। 'ब्रह्मन्' शब्देन अण् प्रत्यय कृते नपुंसकत्वात् 'ब्राह्मण' शब्दः निष्पन्नं भवति। ब्राह्मणं हि वेदनिर्दिष्टकर्मप्रतिपादकग्रन्थः। आचार्य जैमिनि मतानुसारेण मन्त्राणां अवशिष्टभागे ब्राह्मण शब्दस्य व्यवहारं भवति। **शेषे ब्राह्मण शब्दः।**[1] वेदव्याख्यातृत्वादेव ब्राह्मणस्यापि वेदत्वम्। आचार्य भट्ट भास्करानुसारेण कर्म एवं कर्मे प्रयुक्त मन्त्रस्य व्याख्यान ग्रन्थ 'ब्राह्मणम्।' ब्राह्मणनाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः।[2] म.म. विद्याधर शर्मानुसारेण :- वेद चतुष्टयमन्त्राणां कर्मसु विनियेजकः कर्मविधायको नानाविधानादीति -

हासाख्यान बहुलोज्ञानविज्ञानपूर्णो भागो ब्राह्मण भागः।

---

१ - मीमांसा २।१।३३॥

२ - तै. सं. भाष्य १।५।१

अधिकांश ब्राह्मणसाहित्यं गद्यात्मकं विद्यते।[1]

ब्राह्मण प्रतिपाद्यानां विषयाणां त्रेधा विभागःकृतोऽस्ति। विधिभागः अर्थभाग उपनिषद् च । विधिभागे यज्ञविषयकप्रयोगात्मक नियमानां वर्णनमस्ति।[2]

आचार्य लैगाक्षि भास्करानुसारेण - तत्राज्ञातार्थज्ञापको वेदभागो विधिः। तत्र विधिर्नाम कर्मसम्पादननियमः विनियोगे मन्त्राणां प्रयोगनिर्देशः हेतुः कर्मप्रवर्तनप्रयोजन। अर्थवादे उपाख्यानकथादिमाध्यमेन प्रायोगिकरहस्य सूक्ष्मतापरिज्ञानं सम्पाद्यते।[3]

आचार्य आपस्तम्ब मतानुसारेण-कर्मचोदनाब्राह्मणानि। ब्राह्मणशेषोऽर्थवादः। अर्थवादः प्ररोचनात्मकविषय उपाख्यानादिः। उपनिषद भागे आध्यात्मिक दार्शनिकतत्त्वानि मीमांस्यन्ते।विशेषतो ब्राह्मणग्रन्थागृहस्था -श्रमोपयोगिनः। ब्रह्मप्रतिपादनत् ब्राह्मणानां ब्राह्मणत्वम्। यज्ञप्रतिपादनमेव ब्रह्मप्रतिपादनम्।[4]

---

१ -श.ब्रा.भू. ॥ २॥

२-सं.साहित्य।

३ -अणु संहिता पृ ॥३६॥

४- आपस्तम्ब परिभाषा।३४।३५॥

एष वै प्रत्यक्षं यज्ञो यत्प्रापतिः। ब्राह्मणेषु मन्त्राणां कर्मणां विनियोगानाञ्च व्याखयेोपस्थापिताऽस्ति।[1]

ब्राह्मणेषु भाषा गद्यमेव किन्तु तत्र प्रैाढता परिनिष्ठितता च स्पष्टं दृश्यते। वेदानां प्रत्येकं पृथक पृथक ब्राह्मणम्।तत्र ऋग्वेदस्य ऐतरेयशांख्यानाख्ये शुक्लयजुर्वेदस्य शतपथाख्यं कृष्णयजुर्वेदस्य तैत्तिरीयाख्यं सामवेदस्य ताण्डयषड्विंश - साम - आर्षेय - दैवत - उपनिषत्- संहितोपनिषद्वंश - जैमिनीयाख्यानि अथर्ववेदस्य गोपथाख्यञ्च ब्राह्मणानि समवाप्तानि॥[2]

---

१- सं.साहित्य

२ -शतपथ ४।३।४।३।

## तृतीयो विरामः

# वेदोत्तरसाहित्ये कर्मनिरूपणम्

संस्कृतभाषायाम् वेदाः आधारग्रन्थाः वेदेषु सर्वविषयाः प्राप्ताः भवति। वैदिक साहित्ये संहिताग्रन्थाः, आरण्यकानि, ब्रह्मणानि, उपनिषदश्च सन्ति। अस्योत्तरे साहित्ये कर्मविषयकं निरूपणम् यदस्ति तदेव वेदोत्तरसाहित्ये कर्म निरूपणं अस्ति।

वेदात्तरसाहित्ये रामायण, महाभारतम्, स्मृतिग्रनथाः दर्शनग्रनथाः न्यायमीमांसादिकम् सर्वम् सम्मिलितं वर्तते। अत्र यथाक्रमं ग्रन्थाधारेण शास्त्राधारेण च कर्म निरूपणम् विविच्यते।

वाल्मीकि रामायणे कर्मनिरूपणम्

महाभारते कर्मनिरूपणम्

**स्मृतिग्रन्थेषु कर्मनिरूपणम् :--**

श्रुतिस्तु वेदो विज्ञेयाः धर्मशास्त्रम् तु वैस्मृतिः। (मनु)

श्रुति शब्दः वेदत्वेन स्वीक्रियते। स्मृतिग्रन्थाः धर्मशास्त्ररूपेण स्वीक्रियते इति तु मनोक्तिः। अतएव धर्मशास्त्रम् एव स्मृतिः वर्तते। प्रायेण अष्टादश स्मृतयः सन्ति। तद्यथा --

1. मनुस्मृतिः : अध्याय संख्या 12

2. याज्ञवल्क्यस्मृतिः :

3. अत्रिस्मृति : श्लोक संख्या - 398

4. वशिष्ठस्मृतिः :

5. हारीतिस्मृतिः : अध्याय संख्या - 7

6. शंखस्मृतिः : अध्याय संख्या - 10

7. गौभिलस्मृतिः :

8. लिखितस्मृतिः : श्लोक संख्या - 93

9. आपस्तम्बस्मृतिः :अध्याय संख्या -10, श्लोक-192

10. शातातपस्मृतिः :

11. गौतमस्मृतिः : अध्याय संख्या - 29

12. बौधायनस्मृतिः :

13. पाराशरस्मृतिः :अध्याय -12, श्लोक सं.- 602

14. भारद्वाजस्मृतिः :

15. विश्वामित्रस्मृतिः :

16. विष्णु स्मृति : श्लोक संख्या - 113

17. बुध स्मृति : श्लोक संख्या - 45

18. कात्यायनस्मृति : खण्ड - 29,

19. व्यास स्मृति : अध्याय संख्या - 4

आसु स्मृतिषु सर्वविधरूपेण कर्मसिद्धान्तस्य कर्म निरूपणम् प्राप्यते। प्रायेण नित्यकर्म नैमित्तककर्म, प्रायश्चितकर्म च बाहुल्येन अस्ति।

नित्यकर्मणि - संध्यावंदनादीनि वर्णितानि।

नैमित्तिककर्मणि – पुत्र जन्मोत्सवादि विवेचितानि।

प्रायश्चितकर्मणि – कर्मधारेण प्रायश्चित्तानि कथितानि।

मनुस्मृतौ वर्णाश्रमाधारेण कर्म निरूपणम् अस्ति। तत्र ब्राह्मणकर्म, क्षत्रियकर्म, वैश्यकर्म, शूद्रकर्म च इति विस्तरेण निरूपितम्।[1]

**याज्ञवल्क्यस्मृतिः--**

अस्मिन ग्रन्थे व्यवहाराध्याये आचाराध्याये च कर्मनिरूपणम् विहितम्। तत्र कानि-कानि कर्माणि सन्ति तेषां वर्णनम् यज्ञवल्क्येन लिखितमत् अस्ति। तद्यथा --

प्रायेण सर्वासु स्मृतिषु मनुयाज्ञवल्क्यो अनुकरणेन दृश्यते। कर्म विषये सर्वेः महर्षभिः न्यूनाधिकं लिखितमस्ति। अत्र समासेन प्रस्तूयते।

**धर्मसूत्राणि :---**

धर्मसूत्रग्रन्थाः अनेके सन्ति तत्रापि गौतम धर्मसूत्रम् अति प्राचीनं अस्ति। असिमन सूत्रे कर्मवर्णनम् तदाधारेण प्रायश्चितम् अपि च नैमित्तिक कर्मणा विवेचनम् उपलभ्यते।

**दर्शनग्रन्थाः--**

दार्शनिक ग्रन्थेषु उपनिषदतः नयायमीमांसादपि स्वीक्रियते। तत्र कर्मविषयक चर्चा विस्तरेण उपलभ्यते। उपनिषदां कर्मनिरूपणम् तु प्रायेण षष्ठाध्याये अस्ति एव। अत्र अन्य दार्शनिक ग्रन्थेषु कर्मविषयकं विवेचनम् सिद्धान्तश्च अत्र उपस्थाप्यते।

---

1. **मनुस्मृति**

**न्यायदर्शने कर्म निरूपणम् :---**

न्यायदर्शने पंचकर्माणि स्वीक्रियते। यथा --

1. उत्पेक्षण
2. अपक्षेपण
3. आकुंचन
4. प्रसारण
5. गमनानि, इति प्रचकर्मणि अस्ति। किन्तु निश्कामादि कर्मविषये नयाय सूत्रे चर्चा विद्यते।

**सांख्यदर्शने कर्मनिरूपणम् :---**

सांख्यदर्शम् प्राचीनतमं वर्तते। अस्य प्रणेता कपिलमुनि: वर्तते। कपिलस्य जननी देवहुति: आसीत्। कािनकं इदं भागवते प्रसिद्धः वर्तते। सांख्यदर्शनस्य सिद्धान्त: प्रकृति-पुरुष-अनयताख्यातिरूप अस्यैव मष्तिष्के स्फुरिता। सांख्यसाहित्ये त्रिविध दु:खानां आतयन्तिक निवृत्तित्रयं प्रयोजनं उद्घाटितं। कर्म विषये अस्मिन् न्यूना चर्चा विद्यते। कारणं हि मोक्ष प्राप्ति कामनया ये ते उपाया: दर्शिता: तत्रैव कर्मविषयक वर्णनं प्राप्तुं शक्यते। तथापि आचार्यैः लिखितं यत् मनुष्य: चक्रभ्रमवत् अस्मिन् संसार क्रमानुसारेण भ्रमति। त्रिविधं दु:खं मन्यते। तत्र --

1. आध्यात्मिकं।
2. शारीरिकम्।
3. मानसं च।

मनुष्यस्य व्याधि समुत्थितं शरीरं, कामक्रोधादि समुत्थितं च मानसं भवति। कर्मनिरसनाय एव पंचविंशति तत्त्वानां ज्ञानं आवश्यकं कथितम्। भोक्तारूपेण जीवः दुःखादिकम् कर्माधारेण प्राप्यते इति।

**मीमांसा दर्शने कर्मनिरूपणम् :--**

मीमांसा दर्शनम् महर्षभिः जैमिनिः अकरोत। जैमिनी सूत्राणि एव मीमांसायाः आधारः अस्ति। वस्तुस्तु मीमांसा दर्शनम् कर्मपरकं एव अस्ति। तत्र वेदानां मंत्राः कर्मपरकाः एव सन्ति इति असय दर्शनस्य मौलिक सिद्धान्तः। प्रति मन्त्रस्य कर्मपरक अर्थः उद्घोषितः।

# 4. महाकाव्येषु कर्मसिद्धान्तविचार:

संस्कृत जगती अनेकानि काव्यानि महाकाव्यानि च सन्ति। एतयो: अनेके विभागा: भेदश्च सन्ति। तथापि गद्यकाव्यं, पद्यकाव्यं च इति रूपेण भेदद्वयं प्रधानेन स्वीक्रियते। काव्यस्य प्रादुर्भाव: आदिकवित: वाल्मीकि रामायणेन स्वीक्रियते।

महाकाव्यरूपेण वाल्मीकं: रामयणेव प्रथमम् स्वीक्रियते। अस्मिन महाकाव्ये वस्तुत: रामगथा वर्तते। तथापि तत्र कर्मवैविघ्यं दरीदृश्यते। अत्र कर्मणां विभाग: अनेकविधत्वम् दृश्यते। लौकिक जनानां किम् कर्तव्यम् यथा --

1. पुत्र कर्तव्यम् किम्।
2. पत्नी कर्तव्यम् किम्।
3. पितृ कर्तव्यम् किम्।
4. भातृ कर्तव्यम् किम्।
5. राजा कर्तव्यम् किम्।

इत्यादीनाम् विषयाणां कथामाध्यमेन महर्षिणा उपस्थापितं रामायणं कर्मणा गति:, तत्र किम् फलं, किम् वैविध्यं किम् च तत् प्रयोजनं इति सर्वम् उदाहरणेन निगदितम्।

**महाभारत महाकाव्यम् :---**

राष्ट्रीय महाकाव्यरूपेण व्यास रचितम् महाभारतम् जगति प्रसिद्धं वर्तते। महाभारतं हि भूम्ना अनुष्टुपबहुलछन्दोनिबद्धं महर्षिकृष्णद्वैपायनव्यासमहाभागैः प्रणीतं कौरवपाण्डवोर्युद्धवर्णनपरं अनोख्यानोख्यागाथादिभिः सुगुम्फितं धर्मार्थकाममोक्षाणां विशद--विवरणात्मकं परमरमणीयं महाकाव्यं।

उक्तञ्चं महाभारते --

धर्म चार्थे च कामे च मोक्षे च भरतर्षभः।

यदिहस्ति तदन्यत्र यून्नेहस्ति न त्त्वक्वचिद्।।[1]

अस्मिन् महाकाव्ये अष्टादश पर्वाणि सन्ति। तत्रापि अनेकानि उपाख्यानानि वर्णितानि सन्ति। एतेषु उपाख्यानेषु कर्म विषयिकी चर्चा समारोहेण वर्णिताऽस्ति। तत्र प्रधानोपाख्येनानि कर्मपरकानि सन्ति। तद्यथा -

1. शाकुन्तलोपाख्यानम्।
2. मत्स्योपाख्यानम्।
3. सावित्र्युपाख्यानम्।
4. रामोपाख्यानम्।
5. नलोपाख्यानम् च।

---

1. महाभारत

एतेभ्यः उपाख्यानेभ्यः अनेकानि काव्यानि महाकाव्यानि च अनेकैः विरचितानि। एतेषु मध्ये विविधानि कर्माणि लौकिक कर्मीणि, आध्यात्मिक कर्माणि, सांसारिककर्मीणि च निगदितानि सन्ति। एतदिरिक्तं अस्य ग्रन्थस्य भीष्मपर्वणी प्रसिद्धा श्रीमद्भागवतगीताऽपि उपलभ्यते। गीतायां यतकर्म वर्णनं तदेव महाभारतस्यापि कर्मवर्णनं कथयितुम् शक्यते।

अस्य ग्रनथस्य अनेकाः टीका सन्ति। तत्रापि नीलकण्ठचार्यस्य टीका अति प्रामाणिकी प्रसिद्धा च वर्तते।

अस्मिन् ग्रन्थे -- राज्यतन्त्रं किमऽस्ति, अस्योपदेशः, विद्यते। अत्र केचित आदर्शोपदेशः जनानां कृत विहिताः वर्तते।

तद्यथा --

शीलं प्रधानं पुरुषं तद्यस्यमेह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्दुभिः।।

न कुलं वृत्तहीनस्य प्रमाणिमिति मे मतिः।
अन्तेष्वपि हि जाताना वृत्तमेव विशिष्यते।।[1]

---

1. महाभारत

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।
स एव यत्नः क्रियते परराष्ट्रविमर्दने।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने।।

वृत्तं यत्नेन संरक्षेत् वित्त्मायाति याति च।
अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः।।

तृणानि भूमिरुदकं वाक्चतुर्थी न सूनृता।
सतामेतानि गहेषु नोच्छिद्यन्ते कदाचन।।
द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं नृणाम्।
तस्माद् द्यूतन्न सवेत, हस्यार्थमनि बृद्धिमान्।।
परं क्षिपति दोषेण वर्त्तमानः स्वयं तथा।
यश्च कृध्यतीशानः स च मूढतमो नरः।।[1]

---

1. महाभारत

अस्मिन ग्रन्थे मनुष्याणां कृते आदेशः प्राप्यते। यथा --

षटकर्णो भिद्यते मन्त्रश्चकर्णस्तु जातुचित्।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गचछति।।
किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः।
इति सञ्चित्य मनसा प्राज्ञः कुर्वीत वा न वा।।

बहवो यत्र नेतारः सर्वे पण्डितमानिनः।
सर्वे महत्वमिच्छन्ति तद्वृन्दमवसीदति।।
न दैवमिति सञ्चित्य त्यजेदुद्योगमात्मवान्।
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति।।
दैवयोगादुपनताः प्रतिज्ञाहीनसम्पदः।
अकस्मादेव नश्यन्ति खलानामिव सङ्गतम्।।
नहीदृशं संवननं त्रिषु लोकेषु विद्यते।
दानं मैत्री च भूतेषु दया च मधुरा च वाक्।।[1]

---

1. महाभारत

यमर्थ प्रार्थरूते यमर्थ घटते च यः।

सोऽवश्यं तमवाप्नयेति न चेच्छ्रान्तो विवर्त्तते।।

गुणेषु यत्नः क्रियतां किमोटौपैः प्रयोजनम्।

विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः।।

कारणत्प्रियतामेति द्वेष्यो भवति कारणात्।

अर्थाथी जीवलोकोऽयं न कश्चित्कस्यचित्प्रियः।।[1]

एकया -बुद्धया, द्वे-कर्त्तव्याकर्त्ते निश्चित्य, त्रीन्- मित्रोदासीनि - शत्रून्, चतुर्भिः सामदानदण्डभेदैः वशे कुरु। पञ्च-पञ्चेन्द्रियाणि जित्वा षड् -सन्धि-विग्रह-यान-आसन-द्वैधीभाव-साम-आश्रयाख्यान् विदित्वा सप्त- स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पच्चमम्। महञ्च दण्डपारुष्यमर्थदूषणमेव चेत्ति सप्तसंख्याकान् दोषान् हित्वा नरः सुखीभवेदिति तात्पर्यम्।

एकया द्वै विनिश्चत्य त्रींश्चतुभिर्वशे कुरु।

पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भवेत्।।

एकमेवाद्वितीयं तु यद्राजन्नावबुध्यसे।
सत्यं स्वगस्य सोपानं पारावारास्य नौरिव।।।[2]

---

1. महाभारत
2. महाभारत

संस्कृतभाषायां यानि प्रसिद्धानि महाकव्यानि सन्ति। कालिदासस्य, बाणभट्टस्य, दण्डिना, भवभूतेः, माघस्य, राजशेखरश्च अनेके ग्रन्थाः एतादृशाः सन्ति। एषु ग्रन्थेषु कर्मविषयकानि वर्णनानि प्राप्तानि भवन्ति। तस्य विवेचनं संक्षेपेण अत्र प्रस्तूयन्ते।

**कालिदासः ---**

संस्कृतवाङ्मये कविकालिदास्य नाम को न जानाति। अस्य महाकवेः अनेके ग्रन्थाः सन्ति। तत्र कुमारसंभवम्, रघुवंशम्, अभिज्ञानशाकुनतलम् च विशेषेण स्मरयन्ते। कुमारसंभवे कर्मविषयकं वर्णनं अनकेषु श्लोकेषु प्राप्यते। तत्र मानवीयानां प्राकृतेः स्वाभाविकं विश्लेषणं भारतीय संस्कृतेः हृदयावर्जकं वर्णनं अपि कर्मविषये अनेके श्लोकाः सन्ति। दिङ्गमात्र उदाहरय्ते --

सर्वोपमाद्रव्यसमुच्येन यथा प्रदेशं विनिविशितेन्।

सा निर्मिता विश्वसृज्या प्रयत्नात् एकस्थ सौन्दर्यादिदृक्षेव।।[1]

अत्र कर्मविषयकं चित्रणं प्राप्यते। तदवदेव रघुवंशेऽपि अनेकेषु सर्गेषु कर्मविषयिकी चर्चा समुपलब्धा भवति।

अभिज्ञानशाकुन्तले भगवतः प्रतिकृत प्रकृतिवर्णनं मेघदूते च एमस्यैव कर्मभाव प्रस्तुतः कविवर्हैः।

---

1. कुमार.

**बाणभट्टः --**

महाकविबाणेन चातुरी गद्यकाव्ये प्रकटिता। तत्रापि कथाख्यायिका, साहित्य कादमबर्याकर्म विषयक सन्दर्भाः अनेकेषु स्थलेषु सन्निष्टाः भवन्ति। अस्य कवेः नैपुण्यं वर्णनं संस्कृति जगति को न जानाति।

**दण्डिनाः---**

अत्र भवन्तो दण्डिनाः कृतित्वेन त्रयो सनदर्भाः प्राधान्येन। गद्यमयं काव्यं दशकुमारचरितम्, अलंकारयरेः ग्रन्थः कावयादर्शः, छन्दोविचितश्चेति सन्ति। एतेषु ग्रनथेषु अपि कर्मविषयकं तत्वम् वर्णनं च सांकेतिकरूपेण चरितवर्णनाधारेण च अनेन कविता कृतम् इति।

**भवभूतिः ---**

नाटककारेषु अन्यतमः भवभूतिः। एतेन महाकविना नाटकत्रयं रचितम्। तत्र ाारते संस्कृत्याधारेण सर्वम् निगदितम्। तत्र प्राचीनपरम्परा रीतिः - नीतिः - व्यावहारा आध्यात्म ज्योतिषश्च तेन भाषा सौष्ठव माध्यमेन सर्वम् उपस्थापितम्।

**माघः :---**

महाकवि माघेन रचनेका रचिता। यस्य नाम शिशुपालवधम् वर्तते। इदं महाकाव्यम् विंशति सर्गात्मकं अस्ति। तत्र कृष्णचरित्र माध्यमेन शिशुपालवधव्याजेन च भारतीयानां मानवानां नराणाां च सम्यक कर्मविपाकः परिपुष्टितः। तेन अनेकेषु स्थलेषु कर्मविषयकं वर्णनं विहितं। तत्र

पूर्वकालेव न्यायस्य सन्दर्भाः दृक्पथम् प्रयाति। राज्ञः किम् कर्तव्यम् प्रजायाः किम् प्रयाति। राज्ञः किम् कर्तव्यम्, प्रजायाः किम् कर्तव्यम्, विशेषेण कर्मणाकपराकाष्ठा सम्भवति इति निर्धारितम्।

अनेन प्रकारेण कर्मविषयक विवेचनम् वेदतः आरभ्य महाकाव्य पर्यन्तम् प्रायेण सर्वेषु ग्रंथेषु न्यूनाधिकरूपेण उपलभ्यते।

ब्राह्मणग्रंथेषु यत्र धर्मसंगतकर्म तथा च वेदोत्तर साहित्ये मानवानां कर्मनिरूपणम् तथैव महाकाव्येषु व्यावहारिक जीवने विशिष्टानाम् जनानां सामान्यजनानां च कर्मस्वरूपं कीदृशं भवेत्, कीदृशमासीत्, कीदृक्भवितव्यम् च इति सर्वम् एतेषु ग्रनथेषु प्राप्यते। तथापि संस्कृत जगती ये ग्रनथाः समुपलब्धाः भवन्ति ते प्राधान्येन प्राचीन भारतीयानां मानवानां कर्मज्ञान, उपासनानां आधारीकृत्यैव कर्मविषयिकी चर्चा समुपलभ्यते इति।